देव यंतोयुगानिवितन्वतेप्रतिभद्रायभद्रं॥भद्रान्नश्वाहरितः सूर्यस्यचित्राएतग्वाअनुमाद्यासः॥नमस्यंतोदिवआपृथिव्याम॰ ५१

रिद्यावापृथिवीयंतिसद्यः॥तत्सूर्यस्यदेवत्वंतन्महित्वंमध्याकर्तोर्वित
तंसंजभार॥यदेदयुक्तहरितःसधस्थादाद्रात्रीवासतनुतेसिमस्मै।
तन्मित्रस्यवरुणस्याभिचक्षेसूर्योरूपंकृणुतेद्योरुपस्थे॥अनंतम
न्यद्रुशदस्यपाजःकृष्णमन्यद्हरितःसंभरंति॥अद्याद्देवोउदितास्
र्यस्यनिरंहसःपिपृतानिरवद्यात्॥तन्नोमित्रोवरुणोमामहंतामदि
तिःसिंधुःपृथिवीउतद्यौः॥३॥स्मृत्यर्थसारमनाहंसःशुचिषदित्यस्य
वसिष्ठःपुरउष्णिक्॥सूर्योपस्थाने०॥ओंतच्चक्षुर्देवहितंशुक्रमुच्चरत्॥

पूर्ववदृष्यादिस्मृत्वाऋचंपठेत्। परिशिष्टमतान्यच्चक्षुरित्यस्य २

पञ्चेयमन्नारदःज्ञातंजावेमन्नारदःज्ञातंइत्यपतिष्ठत्॥एनडुपस्थानाग्रा
ऋोतुश्डुत्यंचित्रंदेवानामित्यृग्भ्यामेवोपतिष्ठेदितिजयंतानिबंधेगो
ष्पतिमस्त्रेचोक्तं॥ततोपविश्यत्रीम्प्राणायामान्विधायन्यासादिप्रागु
क्तंकृत्वाकरौस्वस्तिकरूपौहृदिनिधाय
यथेष्टकालंसंविंजप्त्वोत्तरन्यासांतेगु
रुमभिवाद्यद्विरात्रमेत्॥इतिमाध्याह्नसंध्या॥अत्रब्रह्मयज्ञसंध्या राम॰
याःसर्वपश्चाद्वेतिविप्रतिपन्नोतत्वमुच्यते॥मध्याह्नेत्वादोमध्याह्न ५२

संध्यांकृत्वेवब्रह्मयज्ञःकर्तव्यइतिस्मृत्यर्थसारादयः॥यदातुकचि
द्देशकालानुरोधेनमध्याह्नात्पाक्कि यतेचेदादौब्रह्मयज्ञस्ततोम
ध्याह्नसंध्येतितत्वमाश्वालायनस्मृतौसंग्रहेणोनकश्राकलकारि
कायांस्मृत्यर्थसारप्रयोगपारिजातादौचावगंतव्यं॥अथब्रह्मयज्ञ
॥॥अक्लिन्नवासाःप्रागग्रदर्भेषुप्राङ्मुखएवोपविश्यपाचम्यानाभिका
मध्यपर्वद्वयेपवित्रेन्यस्यप्राणानायम्यात्मनोदेवर्षिपितृतुष्टिद्वारा
श्रीपरमेश्वरप्रीत्यर्थंब्रह्मयज्ञेनयक्ष्यइतिसंकल्प्यवामजानूपरि

दक्षिणपादंनिधायययाऽस्खलसंकोचादोवामपादंगुष्ठोपरिदक्षि
णपादंगुष्ठंनिधायेतिपृष्ठीचक्रोदयः।एवमुपस्थंकृत्वासव्यपाणि
प्राग्गुलिमुत्तानंदक्षिणजानुशिरसिनिधायतस्मिन्नपस्थिन्नाग्रा
वनंतर्गर्भोप्रादेशमात्रोकुशावनस्खंडितोपवित्रेप्राग्ग्रेनिधाय
तस्मिन्दक्षिणपाणिंसंचंप्राग्गुलिंनिधायसमाहितमना मनसा
गृहेऽन्यत्रमध्यमेनसरेणपठेत्।ॐभूर्भुवःस्वः।।तत्सवितुर्वरेण्यं।
भर्गोदेवस्यधीमहि।धियोयोनःप्रचोदयात्।।तत्स॰हिधियोयोन॰व

ॐ

तत्सवि॰हिधियोयोनःप्रचोदयात्।।ॐअग्निमीलेपुरोहितंयज्ञस्यदेवम
त्विजंहोतारंरत्नधातमं।अग्निःपूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत।
सदेवांएहवक्षति।।अग्निनारयिमश्नवत्पोषमेवदिवेदिवे।।यशसंवी
रवत्तमं।।अग्नेयंयज्ञमध्वरंविश्वतःपरिभूरसि।।सइद्देवेषुगच्छति।अ
ग्निर्होताकविक्रतुःसत्यश्चित्रश्रवस्तमः।।देवोदेवेभिरागमत्।।१।य
दंगदाशुषेत्वमग्नेभद्रंकरिष्यसि।।तवेत्तत्सत्यमंगिरः।।त्रपत्वाग्नेदिवे
दिवेदोषावस्तर्धियावयं।।नमोभरंतएमसि।।राजंतमध्वराणांगोपा

मृतस्यदीदिवि॥वर्द्धमानंस्वेदमे॥सनःपितेवसूनवेऽग्नेसूपायनोभ
व॥सचस्वानःस्वस्तये॥२॥नमोब्रह्मणेनमोऽस्त्वग्नयेनमःपृथिव्यै न
मऔषधीभ्यः॥नमोवाचेनमोवाचस्पतयेनमोविष्णवेमहतेकरो
मीतित्रिःपवित्रापणवंवदेदितिश्रुतिः॥एषब्रह्मयज्ञइतिनारायण
वृत्तौजप्यंतन्निबंधकारिकायांच॥प्रणवव्याहृतीःसकृदुक्त्वागायत्री
पञ्चोर्द्धर्चंशोऽनवसानांचैवंत्रिरुक्त्वाऋचंसकृन्मनुवाकंवातावदथी
त्यनमोब्रह्मणइत्येतांत्रिरुक्त्वाप्रणवंवदेदिति॥अत्रावेदिकास्कृ

अ

राम॰ ५४

स्कृतेनब्रह्मयज्ञपक्षेअग्निमीळेसूक्तंपठेयुरितियाज्ञवल्क्यः॥ऋक्प्र
णवपक्षेतुगायत्रीजातवेदावापवेदितिशौनकः॥अत्रऋष्यादिस्म
रणंमध्येमध्येप्रणवोच्चारणंचनकुर्यात्॥नचास्मरेदृषिच्छंदःआदि
वैतानिकेमखे॥ब्रह्मयज्ञेचवैतौविदितिसर्वानुक्रमोक्तिस्तेनहिन्न
षवचनातिरिक्तविषयेत्यविरोधः॥एवंब्रह्मयज्ञंकृत्वाप्राङ्मुखएव
वोपविश्यदक्षिणंजानुसंपात्यसाक्षतताभिरग्निःसव्यान्नारब्धद
क्षिणपाणिनाजलान्नायेजलेन्यत्रताम्रादिपात्रेपर्णेकुशेवातर्पयेत्

—इत्तथोंकारंतुनोच्चरेदितिरुद्रभट्टीयेसंग्रहोक्तेः॥छंदोदेवत४

प्रजापतिस्तृप्यतु। ब्रह्मा तृप्यतु। वेदास्तृप्यंतु॥ ऋषयस्तृप्यंतु। सवीणिछंदांसितृप्यंतु॥ ओंकारस्तृप्यतु। वषट्कारस्तृप्यतु। व्याहृतयस्तृप्यंतु। सावित्रीतृप्यतु। यज्ञास्तृप्यंतु। द्यावापृथिवीतृप्यतां। अंतरिक्षंतृप्यतु। अहोरात्राणितृप्यंतु। संध्यास्तृप्यंतु। सिद्धास्तृप्यंतु। समुद्रास्तृप्यंतु। नद्यस्तृप्यंतु। गिरयस्तृप्यंतु। क्षेत्रौषधि, वनस्पतिगंधर्वाप्सरसस्तृप्यंतु॥ नागास्तृप्यंतु। वयांसितृप्यंतु। गावस्तृप्यंतु। साध्यास्तृप्यंतु॥ विप्रास्तृप्यंतु। यक्षास्तृप्यंतु। रक्षांसितृप्यंतु। भूतानितृप्यंतु। एवमंतानि

तृप्यंतु॥ इतिदृष्टिश्रोतनकीयाश्चैकोनविंशान्मंत्रैःकुशाग्रैर्देवतीर्थेनैक
कवारंतर्पणंकुर्यात्॥ ततोनिवीतीऋषितीर्थेनकुशमध्यतःसव्यवा
भिरङ्गिःस्नातचिनस्तृप्यंतु॥ माध्यमास्तृप्यंतु। मृत्समदस्तृप्यतु। विश्वामि
त्रस्तृप्यतु॥ वामदेवस्तृप्यतु॥ अत्रिस्तृप्यतु॥ भरद्वाजस्तृप्यतु। वसिष्ठ
स्तृप्यतु। प्रगाथास्तृप्यंतु॥ पावमान्यस्तृप्यंतु। क्षुद्रसूक्तास्तृप्यंतु। महासू
क्तास्तृप्यंतु॥ इतिदृष्टिश्रोतनकीयाश्चद्वादशमंत्रैःसकृन्मंत्रेणसकृत्
स्नामेवंविधिर्दिवारंतर्पणंकुर्यात्॥ ततःप्राचीनावीत्यन्वाचितसव्यज

नुःकुशमलायैःखड्गेनपितृतीर्थेस्तृप्यन्तिलाभिरद्भिःसुमंतुजैमिनिवै
शंपायनपैलसूत्रभाष्यभारतधर्मव्यासस्तृप्यंतु॥ जानंतिबाद
विगाग्र्यगौतमशाकल्यबाभ्रव्यमांडव्यमांडूकेयास्तृप्यंतु।गर्गीवा
चक्नवीतृप्यतु॥वडवात्रातीथेयीतृप्यतु।सुलभामैत्रेयीतृप्यतु।कहो
लंतर्पयामि।कौषीतकंतर्पयामि।महाकौषीतकंतर्पयामि।पैंग्यंतर्प
यामि।महापैंग्यंतर्पयामि।सुयज्ञंतर्पयामि॥सांख्यायनंतर्पयामि॥
ऐतरेयंतर्पयामि॥महैतरेयंतर्पयामि।शाकलंतर्पयामि॥बाष्कलं

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

तर्पयामि॥सुजातवक्त्रंतर्पयामि॥औदवाहिंतर्पयामि॥महौदवाहिं
तर्पयामि।सौजामिंतर्पयामि॥शौनकंतर्पयामि॥आश्वलायनंतर्प
यामि।येचान्येआचार्यास्तेसर्वेतृप्यंति॥इतिवृत्तिशौनकीयाऋग्वे
विंशतिमंत्रैसकृन्मंत्रेणद्विस्तूष्णीमेवंत्रिस्तिस्तर्पयेत्॥पितृतर्पणक
मस्तुहेमाद्रौ॥ तातांवास्तितयंसपत्नजननीमातामहादित्रयंस
स्त्रिस्त्रीतनयादितातजननीस्वभ्रातरःसस्त्रियः॥तातांबात्मभगि
न्यपत्यधवयुक्जायापितासद्गुरुःशिष्याप्ताःपितरोमहालयविधौ

तीर्थेनयातर्पणइतितर्पणप्रकारमाह्यमः॥ संबंधनामगोत्रेणस्वधा
नतुनमस्तत॰।वस्वादिरूपंनिर्दिश्यतर्पयेत्पितृपूर्वकमिति।तथाना
मोच्चारणेविशेषोहेमाद्रौ।ब्रह्मर्षितंब्राह्मणस्योक्तंवर्मेतंक्षत्रियस्यतु
गुप्तांतंचैववैश्यस्यदासांतं शूद्रजन्मनइति।तथा।स्त्रीणांदांतं नाम
ज्ञेयं॥ स्त्रीणांदांतं नामनिर्दिशेदितिहेमाद्रौचंद्रोदये गोभिलसूत्रोक्ते
॥गौडास्तुदेवीशब्दांतमाहुः॥अन्येतुदेविदासीतिद्वयोः समुच्चय
माहुस्तद्युक्तं॥व्यासः।एकैकमंजलिंदेवा द्वौद्वौतुसनकादय॥अ

ईतिपितरस्त्रीस्त्रीन्स्त्रियस्त्रैकैकमंजलिमिति॥अत्रपितृग्रहेनमनुष्य
पितरोदिव्यपितरश्चसंगृहीताः। अत्रस्त्रीपदंमात्राद्यनिरुक्तविषयं।मा
तृमुख्यास्तुयास्तिस्रस्तासांस्त्रीस्त्रीजलांजलीन्॥सापत्नाचायेपत्नी
नांद्वौद्वौदद्याज्जलांजलीनितियमोक्तेः॥तथा॥मातुस्त्रीनंजलीन्दद्या
दन्यासामेकमंजलिमित्याचाररत्नोक्तेश्च॥अत्रजलांजलीनिरग नि
लांतरविषयं।अत्रावश्येनसव्येनदक्षिणेनतुपाणिनेतिस्मृत्यर्थसा
रस्मृतिसंग्रहयोरुक्तेः।तर्पयेदितिशेषः।तथा॥दक्षिणंप्रतीयादनादे

ग्राद्धतिश्रौतपरिभाषायामुक्तश्च।पित्रर्तपणेरूपंवक्तव्यमितित्रयोगप्र
रिजाते।नेतिहेमाद्रिः।।अत्रद्वितीयाविभक्तिर्द्वेया।अत्रप्रतितर्पणंम
न्त्रावृत्तिरित्याचारदीपेभट्टकमलाकरः।सूत्रेआवृत्त्यनुरूक्तात्मकन्म
त्रेणद्विरुक्तंसर्वत्रैवंकर्माद्वन्द्वाविति श्रौतपरिभाषायामुक्तत्वाच्चास्व
लायनानांनमंत्रावृत्तिः।।तथा।।स्मृत्यांजलिविधानेपिवह्निचानांनमं
त्रावृत्तिरित्याचाररत्नेसाधितमेव।तथा।।एकमंत्राणिकर्माणीतिना
रायणोक्तोकपर्दिसूत्रन्यायोक्तश्चनमंत्रावृत्तिरित्यलं।। अथपित्रर्तर्प

णप्रयोगः।।अस्मत्पितरममुकशर्माणममुकगोत्रंवसुरूपंस्वधानम
स्तर्पयामीत्येतदंतेनसकृन्मंत्रेणद्विरुक्तंजलंदेयंसर्वत्र।। अस्मत्
पितामह० शर्माणममुकगोत्ररुद्ररूपंस्व०।। अस्मत्पितामह०
शर्म०ममु०गोत्रमादित्यरूपंस्व०।।अस्मन्मातरममुकदेविदाममुकगो
त्रांवसुरूपांस्व०।।अस्मत्पितामह्यैममुकदेविदाम०गोत्रांरुद्ररूपांस्व०
अस्मत्पितामह्यैममुकदेविदाम०गोत्रांआदित्यरूपांस्व०।। अस्म
त्सापत्नमातरंममु०देविदाम०गोत्रांवसुरूपांस्व०।।सकृन्मंत्रेणसकृत्

स्त्री॥असमन्मातामo ऋ॰मo गोत्रं वसुरूपंसपत्नीकंस्वo॥असमन्मा
तुःपितामहममुकऋ॰ममु॰गोत्रंरुद्रo सपत्नीकंस्वo॥असमन्मातुःप्र
पितामहममुo ऋ॰मo गोo आदित्यरूपंसपत्नीकंस्वo॥असमत्पत्नी
अमुकदेविदाममुo गोत्रांवसुरूपांस्वo॥१॥असमत्सुतंअमुo ऋ॰म
मुo गोत्रंवसुरूपंसपत्नीकंसापत्यकंस्वo॥असमद्दुहितरंअमुकदे
विदाममुo २ गोत्रांवo सभर्तृकांसापत्यकांस्वo॥असमत्पितृव्यंअ
मुकऋ॰ममुकगोo वo सपत्नीकंसापत्यoस्वo॥असमभ्रातरंअमुo ऋ॰

१असमन्मातुलंअमु॰ऋ॰ममु॰गोत्रंव॰सप॰सापत्यंस्व॰१

ममुo गोत्रंवo सपत्नीo सापत्यंस्वo॥असमत्पितृष्वसारंअमुकदेविदाम
मुo गोo वo सभर्तृकंसापत्यoस्वo॥१॥असमन्मातृष्वसारंअमुo गोत्रांवo
सभर्तृकंसापत्यoस्वo॥असम भगिनींअमुo देविo अमुo गोo वo सभ
र्तृकंसापत्यoस्वo॥असमत्श्वश्रूंअमुकऋ॰ममुo गोत्रंo सपत्नीकंसाप
त्यoस्वo॥असमद्गुरुंअमुo गोo वसुo सपo सापo स्वo॥असमदाचार्य
ऋमोणंगोत्रंवoस्वo॥असमदाचार्यपत्नीअमुo देविदांअंoगोo वoस्व
असमद्भिष्यंऋ॰गोo वo सपत्नीo सापoस्वo॥असिन्मित्रंअo ऋ॰अo

गोत्रेव० सपत्नी० सापत्य० स्वधानमस्तर्पयामि॥स्मृत्यर्थमारे॥सुहृत्सं
बंधिबांधवांश्चऽव्यान्नदातृपोषकश्चिन्ददासत्नाश्चरूपंनिर्दिश्य
तर्पयेत्॥तिलाभावेसुवर्णरौप्यताम्रदर्भयुतोदकैः॥स्वकमौक्तिकह
स्तेनकार्य्यवातिलतर्पणं॥नकेवलंजलेनैवकर्त्तव्यंतिसंभवेस
म्यांरविवारेचजन्मर्क्षेदिवसेषुच॥गृहेनिषिद्धंतिलतर्पणंतद्ग
हिभेवेदिति॥अत्रगृहादाहृतोदकेनानिषिद्धेहनितिलतर्पणेवि
शेषमाहयोगयाज्ञवल्क्यः॥यदुहृतप्रसिंचेत्तुतिलान्संमिश्रयेज्ज

ले॥अतोन्यथातुसव्येनतिलयाह्यविचक्षणेरितिव्यासंगृहेतिल
तर्पणनिषेधःसप्तथकतिलाभिप्रायोज्ञेयः॥गृहेत्वनुहृतोदकासंभ
वात्॥नहृतेतुतिलमिश्रणाभिधानाच्चेत्यादिग्रंथांतरादवगंतव्यं
अथसंक्षिप्तपित्रतर्पणं॥आब्रह्मस्तंबपर्यंतंदेवर्षिपितृमानवाः॥त
एतेतृप्तिरःसर्वेमातृमातामहादयः॥अतीतकुलकोटीनांसप्तद्वी
पनिवासिनां॥आब्रह्मभुवनाल्लोकानिदमस्तुतिलोदकमित्येकं ज
लांजलिंदद्यात्॥अत्रतिलतर्पणनिषेधेतुतिलपदस्थानेइदमस्तुकु

शोदकमित्याद्यहः कार्यइतिकेचित्॥न्यायविदस्त्वत्रमंत्रेलोपोवेत्याहुः॥
नप्रकृताव्हइतिन्यायात्॥तथा॥ततोगृह्यपरिशिष्टाऽपवीतीयेके
चास्मत्कुलेजातास्त्रयस्त्रीणोमृताः॥तेगृह्णंतुमयादत्तंवस्त्रंनिष्प
ड्यवामप्रकोष्ठेनिक्षिपेत्तएतद्दहस्नानादौवस्त्रंनिष्पीडनंनकुर्यात्
संक्रांत्यांपौर्णमास्यांह्यादश्यांश्राद्धाहेगृहेचवस्त्रंनिष्पीडनंनकुर्योदि
त्याचारत्नेपराशरोमनौ॥ततोद्विराचम्यांगानिरिक्तवस्त्रस्त्रावित राम.
जलैःश्रपीपात्रंदेवद्रव्यासाधनंचादायगृहमागत्यादौवैश्वदेवंकुर्यादि ६१

५निष्पीडनोदकमितिमंत्रेणपरिधानीयवस्त्रंचतुर्गुणमुपरिदशांस्थले५

तिसमृत्यर्थसारश्चलायनव्याससारायणः॥इतिब्रह्मयज्ञतर्पणप्रयो
गः॥अथवैश्वदेवः॥कारिकायां॥वैश्वदेवंगृहस्थस्यप्रातरारंभणंन
वेत्॥तंत्रंनास्यत्रभगवद्दत्तिकारवचोयथा॥औपासनाग्निमन्यंवा
समिध्याथहविर्भुजं॥पर्युह्यपरिषिच्याग्निमलंकृत्यचरुंश्रपेत्॥हवि
ष्यंपक्वमादाय घृतमिश्रित्यानलेचतत्॥प्रोक्ष्योद्धास्यघृताभ्यक्तंह्र
दिसंनिधायचेति॥अन्यंपचनाग्निंप्रयत्नेनस्थंडिलेवात्मनोसंस्था
प्याचम्याग्नेःपश्चिमतःप्राङ्मुखउपविश्यप्राणानायम्याग्निंप्रदीप्यममो

ह्य

पात्तऽरितक्षयद्वारास्त्रीपरमेश्वरप्रीत्यर्थेप्रातःसायंवैश्वदेवोसमा
नतंत्रेणयक्षेऽतिसंकल्प्यचत्वारिशृंगेत्यस्यवामदेवोऽग्निस्त्रिष्टुप्॥अ
ग्निमूर्त्तिध्याने विनियोगः॥ॐचत्वारिशृंगात्रयोअस्यपादाद्वेशीर्षस
प्तहस्तासोअस्यात्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्यांआविवेश
इत्यग्निमूर्त्तिध्यात्वाऽग्नेरीशानादिग्भागारभ्यप्रदक्षिणंत्रिरंभसाप
रिसमुह्यतथैवत्रिःपर्युक्ष्यविश्वानिनइतिद्वाभ्यांसर्ववदग्निमलंकृ
र्यात्ययोपस्तीर्यसिद्धंहविष्यान्नंपृथक्पात्रेऽहृत्यतत्पात्रमग्नावधि

२दक्षिणजानुसंपात्यहृदिसव्यंनिधाय२

श्रित्यप्रोक्ष्योदगुद्वास्याऽग्नेःपश्चिमतोनिधायाग्निमलंकृत्येतिजयंतः॥
ततस्तदन्नंत्रिधाविभज्यवासर्पिषाभज्यदक्षिणभागस्थितादन्नाद
गुल्यग्रैःपिंडप्रमाणमाकृष्य
लकमितंवादायप्रणवादिवर्जितैः॥सूर्यायस्वाहा॥सूर्यायेदंनम
म।एवमग्रेपि॥प्रजापतयेस्वाहा।सोमायवनस्पतये०॥अग्नीषोमा
भ्यांस्वाहा॥इंद्राग्निभ्यां०॥द्यावापृथिवीभ्यां०॥धन्वंतरये०॥इंद्राय
०।विश्वेभ्योदेवेभ्यः"ब्रह्मणे०॥अग्नयेस्वाहा॥ततःप्रजापतयेस्वाहे

त्यादिब्रह्मणइत्यंताःसर्वेवमंत्रावृत्तीर्कृत्वाविकल्पेनव्याहृतिभिर्कृ
त्वोंचमइत्यपस्तायपर्युक्षणेकृत्वाविश्रतिधारणंकुर्यात्॥ इ
तिदेवयज्ञः॥ अथभूतयज्ञः अग्नेरुत्तरतोभूमिंप्रोक्ष्यमध्यमा
ङ्गुलितादन्नाद्धदरीफलमितंवाद्रायस्पोषायस्वाहेत्यादिपूर्ववद्ब्रह्म
प्राक्संस्थांपंक्तिंकृत्वांतरालमुल्कान्तदग्रेपिप्राक्संस्थामेवपंक्तिंकु
र्यात्॥अद्भ्यः०॥ओषधिवनस्पतिभ्यः०॥गृह्याय०॥गृहदेवताभ्यः० राम.
अग्नेरुत्तरेइंद्राय०॥ऐंद्राद्उत्तरेइंद्रपुरुषेभ्यःअंतराल ६३
वास्तुदेवताभ्यः०॥

दक्षिणेयमाय०॥तदुत्तरेयमपुरुषेभ्यः०॥अंतरालस्यपश्चिमेवरुणाय०॥तदुत्तरेवरु
णपुरुषेभ्यः०॥अंतरालस्योत्तरेसोमाय०॥तदुत्तरेसोमपुरुषेभ्यः०॥अंतरालस्य
समंध्ये पिंपंक्तिरूपाश्चत्वएवेतिगृह्यपरिशिष्टजयंतौ॥ब्रह्मादिभि
चतुर्भिश्चअंतरालेबलीन्हरेदितिजयंतवचनात्॥तद्यथा॥ब्रह्मणे०॥
ब्रह्मपुरुषेभ्यः०॥विश्वेभ्योदेवेभ्यः०॥सर्वेभ्योभूतेभ्योदिवाचारि
भ्यः०॥सोमपुरुषबलेरुत्तररक्षोभ्यःस्वाहेतिजयंतः॥रक्षोभ्यइदं
परिषेकंतंतःकृत्वापित्रयज्ञोभवेदथेतिजयंतः॥एवमेवाग्नयेस्वाहे
त्यारभ्यसर्वेभ्योभूतेभ्योनक्तंचारिभ्यःस्वाहेतिविशेषेणसर्ववद्वि
तीयभूतयज्ञंपरिषेकांतंकृत्वापित्रयज्ञोकुर्यात्॥अत्रभूतयज्ञादाव

पिसर्वत्रोद्देशात्यागोकुर्योदेवेत्याचारदीपभट्टकमलाकरः॥श्रोत्रा
तिदेशाच्च॥इतिप्रेतयज्ञः॥अथपित्रयज्ञः॥प्राचीनावीतीवामजा
नुसंपात्याग्नेय्यांनतूत्तरभागस्थादंगुष्ठपर्वमात्रान्संजलमादाय
स्वधापित्रभ्यःइतिमंत्रमुच्चार्यपित्रर्थेनयमबलेःकिंचिदाग्नेय्यां
निनयेत्॥पित्रभ्यइदंनमम॥परिषेकंचकृत्वेवद्वितीयंपित्रयज्ञंकृ
त्वापरिषेकंकुर्यात्॥परिषेकंततःकुर्याद्वैश्वदेवंसमापयेदितिजय
न्तः॥इतिपित्रयज्ञांतोवैश्वदेवः॥अथवायमबलिः॥तत्रपित्रयज्ञान्त

शेषंपिंडप्रमाणमादायवामेनजलपात्रंचादायगृहाद्बहिर्गत्वा
क्रमोजलमासिंचयत्॥ऐंद्रवारुणवायव्यायाम्यानैर्ऋतिकाश्चये
तेकाकाःप्रतिगृह्णंतुभूम्यांबलिंमयार्पितंवैवस्वतकुलेजातोह्यस्य
मद्बलेनोभुनो॥ताभ्यांबलिर्मयादत्तोरक्षेतांपथिमांसदा॥यभ
ताःप्रचरंतिदिवानक्तंबलिमिच्छंतोविङस्यप्रेषाःतेभ्योबलिंभुष्टि
कामोहराम्यहमयिपुष्टिंपुष्टिपतिर्ददात्वितिसर्वेभ्योबलित्रयंदत्वा॥
गोदोहनकालंतत्रैवस्थित्वातिथिमाकांक्षेयद्ग्लोपाद्दोषक्षाल्याच्च

म्यगृहंप्रवेशयेत्॥शंतानःपृथिवीशिवमंतरिक्षं द्यौर्नोदेव्यभयन्नोअस्तु।
शिवादिशःप्रदिशान्नुदिशोनआपोविद्युतःपरिपांतुसर्वतःशांतिः॥३॥
यजमानेबहिर्हौरिगतेपत्न्याद्यन्येनवाभृतयज्ञाद्युद्धृत्यासुगोद्विजा
ग्नतिथिभ्योवाप्रतिपादयेदितिकृष्णभट्टीकारः॥इतिकाकबलिः॥
अत्रेवमनुष्ठानक्रमेकानिचिन्मूलवाक्या निलिख्यंते॥यथाचभ
ट्टौजीयेग्राम्यलायनस्मृतिः॥सायंप्रातर्वैश्वदेवोकर्त्तव्योबलिकर्म राम॰
च॥अनग्नताप्रकर्त्तव्यावन्यथाकिल्बिषीभवेत्॥वैश्वदेवंद्विजान ६५

कंनग्नवेश्मस्थकृष्यकृत्प्रातरेवहिरग्न्याकुर्यात्सहस्तोद्विजः॥३
नग्नेत्रेवल्दाग्न्यलायस्मृते॥सयोदिग्याहुनेत्सर्वमग्न्यादिभ्यसतः
परं॥हुत्वाव्याहृतिभिःपश्चाद्धुतयज्ञोतथवचेति॥अत्रालेनग्न्या
हृतिहोमोवैकल्पिकः॥तथाशाट्यस्कदेवयज्ञसहत्वबृहुतयज्ञपित्र
यज्ञक्रियार्थेः॥एवकारस्कदेवयज्ञादीनांपरस्परंसहत्वनिश्चयार्थ
॥चकारस्कपित्रयज्ञद्योतनार्थइति॥अत्रदेवभूतपित्रयज्ञावैश्वदे
वत्वेनोच्यंतइतिमत्यर्थीसारत्रयोगपारिजातौ॥अथमनुष्ययज्ञः

गृहागतमतिथिमभ्यागतंवाप्राङ्मुखमुपवेश्यपादौधादिनाभ्यर्च्यनिवी
तीस्वयमुदगाननोद्विज भोजनपर्याप्तमन्नंसनकादिम नुष्येभ्य
इदंहंता॥मनुष्येभ्यइदमन्नंनममेतित्यक्त्वानेनभोजयेत॥ततः
स्मृतिप्राप्तंनित्यश्राद्धंकुर्यात्तत्रौसत्यां॥नवाकुर्यान्नरात्रावि ति
थ्यीवंद्योदयः॥अत्रातिथ्याभ्यागताभावेतुपात्रांतरेषाडङ्गाग्र
यपरिमितान्नंत्यक्त्वाद्विजादिभ्यःप्रतिपादयेत॥तदभावेब्रह्मयज्ञ
दक्षिणार्थंब्राह्मणायतिब्रह्मचार्यादिभ्योभिक्षात्रितयंवादद्यादिति

वाजपेययाजिनः॥इतिमनुष्ययज्ञः॥भिक्षादानेविशेषमाह्यम
मत्कृत्यभिक्षवेभिक्षांयःप्रयच्छतिमानवः॥गोप्रदानसमंपुण्यंत
स्याहभगवान्यमइति॥भिक्षुकानाह्यात्रवल्क्यः॥ यतिश्चब्र
ह्मचारीचविद्या स्त्रीगुरुपोषकः॥अध्वगःक्षीणवृत्तिश्चषडेतेभि
क्षुकाःस्मृताइति॥गौतमः॥यतिहस्तेजलंदद्याद्वैक्षंदद्यात्सुनजे
लं॥नवैक्षंमेरुणातुल्यंनजलंसागरोपममिति॥ब्रह्मचारिणेभव
भिक्षांददातुस्वस्तीतिवाचयित्वाततहस्तेजलंप्रदायभिक्षांदद्यात

अन्येषांभैक्ष्यदानेनजलदानादि॥अतिथ्यर्थंचतत्रैव॥अस्नातोवाय
दिचांडालःश्वपचोवाब्रह्मघातकः॥आगतोवैश्वदेवांतेसोतिथिःस्व
र्गदायकइति॥यतिब्रह्मचारिणोयदिवैश्वदेवांतेसमागच्छतस्त
दातेवं॥यदिवैश्वदेवात्सर्वमप्राप्नुतस्मादाकथमित्याहगौतमः॥वै
श्वदेवेतुसंप्राप्तेभिक्षुकेगृहमागते॥उद्धृत्यवैश्वदेवार्थंभिक्षांद
त्वाविसर्जयेत्॥वैश्वदेवाकृतंपापंशाकोभिक्षुर्व्यपोहतुं॥नहिभि
क्षुकृतोदोषान्वैश्वदेवोव्यपोहति॥यतिश्चब्रह्मचारीचपक्वान्न

रम॰ ६७

स्वामिनाबुभौ॥तयोरन्नमदत्वातुभुक्त्वाचंद्रायणंचरेदितिनिषेधा
त्॥तस्मात्पुरुषाहारप्रमाणंमतंवैश्वदेवार्थंनैवेद्यार्थंचतावत्स्थ
कृत्वागृह्यशिष्टादन्नाद्भिक्षांदत्वातंविसृज्यततोवैश्वदेवादि
कुर्यादितिमाधवः॥पंचयज्ञप्रशंसामाहाचारिलोमरीचिः॥यत्फ २
लंसोमपानेनप्राप्नोतिधनवान्द्विजः॥सम्यक्पंचमहायज्ञैर्दरिद्र
स्तदवाप्नुयादिति॥ इतिपंचमहायज्ञाः॥ अत्रस्वैवऋंधादिपंचोप
चारैर्देवस्नानंकुर्यात्॥अत्रकेचित्पुराणधर्मप्रधानवेत्स्वास्तविष्णो

निवेदितान्नेनयष्टव्यंदेवतांतरमितिश्रुत्यवचनादादौदेवस्रजांक
त्वावैश्वदेवंकुर्वंति॥वैश्वदेवांतेदेवस्रजांकुर्योदितिबह्वृचाः॥अथ
श्वलायनानांतुगृह्यपरिशिष्टे॥सएषदेवयज्ञोहरहर्गोदानंमि
तःसर्वाभीष्टप्रदःस्वर्ग्योपवर्ग्यश्चतस्मादेनमहरहःकुर्वीतप्रथमं
वैश्वदेवंकृत्वाशेषेणेष्टयाग्नेनवाकुर्यान्नास्यशेषेणवैश्वदेवंकु
र्यादित्यृक्त्वादावैश्वदेवस्तुतोदेवयजे तियुक्त मित्याचार
दीपिकाकमलाकराः॥तथा॥वैश्वदेवंपुराकृत्वानित्येचाभ्युदये

तथा॥स्वाभीष्टदेवतादिभ्योनैवेद्यंविनिवेदयेत्॥अकृत्वावैश्वदेवं
तुनैवेद्यंविनिवेदयेत्॥तदन्नंनैवशूद्रंतिदेवाविश्वादयोध्रुवं इ
त्याश्वलायनस्मृतावुक्तेः॥तथा॥वैश्वदेवविधिंकृत्वानैवेद्यादीन्य
र्कमर्पयेत्॥स्नातस्यश्राद्धाधिकारीस्यात्संध्यास्नेहोमनोर्जपे॥वैश्वदे
वविष्णुरुद्रोसोविष्णोरन्नंनिवेदयेदितिधर्मप्रदीपेबह्वृचमन्त्रैश्च॥
तथाचमाधवीयप्रयोगपारिजातादिष्वपिदेवार्चनात्प्रागेववैश्व
देवक्रियोक्तिरस्तीत्यलंवचनभारेण॥एवंदेवार्चनमभिधायैकपञ्चा

रेगोब्राह्मणसज्जंचकृत्वाभुंज्यात्॥अथभोजनप्रकारः॥आश्वलाय
नस्मृतौ॥अष्टम्योश्चचतुर्दश्योरात्रावस्नानिनित्यशः॥एकादश्या
मुपवसेच्छुक्लपक्षेविशेषतः॥अर्कद्विपर्वरात्रौचचतुर्दश्यष्टमीदि
वा॥एकादश्यामहोरात्रंभुक्त्वाचांद्रायणंचरेत्॥अत्रदिङ्नियमः॥
कोर्मे॥प्राङ्मुखोन्नानिभुंजीतसूर्याग्निषु खएववेति॥श्रुताक्ष
वं॥मनुः॥आयुष्मान्प्राङ्मुखोभुंक्तेयशस्वीदक्षिणामुखः॥धन रम.
वान्पश्चिमायांतुधर्मेवानुत्तरामुखइति॥तथा॥प्राङ्मुखोदङ्मुखो ६९

वापिभुंज्यादितिब्राह्मात्॥तथा॥प्राच्यादिदिङ्मुखोभुंज्यान्नकदा
चिद्विदिङ्मुखइतिस्मृत्यर्थसारादयः॥यत्तुवचनंनकदाचिदुदङ्मु
खइत्यविणोक्तंतत्पुत्रवतामेव॥उक्तंचस्मृतिसंग्रहे॥पुत्रवान्सदृ
दितिंयनाश्नीयादुत्तरामुखः॥सोमवारेतथाभ्यंगंवर्जयेत्तुसदा
बुधइति॥तथाचदक्षिणाभिमुखोनभुंज्यात्॥उक्तंचसंग्रहे॥शि
रोवेष्टचयोभुंक्तेयोभुङ्क्तेदक्षिणामुखः॥सोपानत्कःपिबेद्भुंक्ते
तद्वैरक्षांसिगच्छंतीति॥अत्रदक्षिणामुखनिषेधोजीवन्मात्रविष

यः॥उक्तंचप्रयोगपारिजातेस्मृतिमंजर्याम्॥पितरौजीवमानौचे
न्मात्रीयाद्दक्षिणामुखः॥तयोस्तुजीवमानेकस्तथैवनियमस्म
मइति॥तथा॥अनिशं मातृहीनानांयत्रास्यद्दक्षिणामुखमिति
विज्ञानेश्वराच्च॥स्मृत्यर्थसारे॥शुचिःश्रीपर्व्योद्दिश्यक्षणचतुष्क
मीवघ्नमोपादोनिधायोपविश्यमतिविभवेरत्नहिरण्यपाणिगं
धाक्षतमाल्यवाक्कृतवहुरस्त्रगोमयजलमंडलेवापालिकायंत्रं
न्यस्यवातत्रसौवर्णरौप्यंकांस्यंतच्चकांस्यद्विपंचाशा त्पलंह्यात्रिंशा

त्पलंविंशतिपलाद्वर्धंयथासंभवंवाश्राद्धपारणेतिरिक्तेषुमहत्त्व
त्रंलघुपात्राणिचप्रक्षाल्यतत्रादोवान्यस्याभिधार्यकृतंपंचय
ज्ञावशिष्टंसर्वंसुसंस्कृतंहितंमितंमातृभार्यादित्तमतिथ्याभ्या
गतभृत्यपुत्रपौत्रादीश्चस्वदक्षिणतुपवेश्ययपरिवेषयेत्॥नत्वं
त्रिकादौयतिब्रह्मचारीविधवाचभुंजीतेतिस्मृत्यर्थसारः॥परिवे
षणेतुभक्ष्यंदक्षिणभागेपेयंलेह्यंचवामभागेस्थापयेत॥शा
कादीसुरतस्यापिभक्ष्यंभोज्यंचवामतः॥अन्नंमध्येप्रतिष्ठाप्य

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

क्षिणोघृतपायसे ॥ज्ञातातप:॥लवणंव्यंजनंचैवघृतंतैलंतथैवच।
ह्यंपेह्यंचविविधंहस्तदत्तंनभक्षयेदिति।दर्व्यैवसर्वेप्रत्यक्षल
वणंचान्य द्रव्येणसंमिश्र्यपरिवेषयेदितिसांप्रदायिका:।।वि
वाहवर्ज्येननार्य्याश्रिश्रुभि:सहभुंजीतेतिस्मृत्यर्थसार:।।वि
वाहेधनिचभार्य्ययाश्रिश्रुभि:सहभुंजीतवेतिविज्ञानेश्वरमा
धवोभोजनशालायांनाचामेत्।नग्नद्यौभुंज्यात्।इत्यादिग्रंथां
तराद्वगंतव्यं॥ततःपरिविष्टपात्रान्नमकुत्सयन्ब्रह्मग्रंथिरस्ति

रा॰ ७१

पवित्रपाणिरादावन्नंप्रणम्यनित्यमस्येतदित्यृक्कारस्तोपादो
चास्यमवंपंचांगादेतिज्ञानुकर:प्रणवव्याहृतिसर्वयागायत्रया
न्नमभ्युक्ष्योत्तरियादिदत्राप्रणवेनाभिमंत्र्य सत्यंत्वर्तेनप
रिषिंचामीतिदिवा॥रात्रौतुऋतंत्वासत्येनपरिषिंचामितिप्रद
क्षिणंपरिविष्टपात्रंपरिषिच्यपात्राद्दक्षिणेकरमावुदकधारां
दत्वातत्रपरिशिष्टमतास्त्रीबलीनाड्रीमलकमितघृतप्लुतान्न
नत्राक्षंस्यांप्रत्यक्संस्थावापंड्रिं:कुर्यात्॥ऋतायेनम:।प्रा

रादायभुवनपतयेनमः॥पुनरादायभूतानांपतयेनमः॥इतिपं
क्तिं कृत्वोपर्युदकधारांदत्वाबलीनुद्धरेत्॥भोजनादोबलेरन्नंय
वङ्मोचतिष्ठति॥अभोज्यंतन्नवेदनंतत्स्नानात्संत्यजेद्बुधइति
शातातपोक्तेः॥तथा॥चित्राकुतीरनुद्धृत्ययोभुङ्क्तेग्रासंपदंक
अघंसकेवलंभुङ्क्तेज्ञानतोऽज्ञानतोपिवेतिस्मृतेः॥तथा॥भो
जनादोबलिर्मुक्तःसमुद्धृत्यहिभोजनं॥अनुद्धृत्यतुयोभुङ्क्ते
प्राणायामाष्टकंचरेदितिकृष्णमहीयिरामाचिनवंडिकायांप्राय

श्चित्तमुक्तेश्च॥ततोऽस्तंघक्षात्मभुंजीतेतिमनुः॥स्मृत्यर्थसारे॥ततो
पोशानार्घंजलमादायवामपाणिमध्यमानामिकांगुष्ठभोजनपात्रंधृत्व
अन्नंब्रह्मरसोविष्णुर्भोक्तादेवोमहेश्वरः॥एवंध्यात्वातुयोभुङ्क्तेअ
न्नदोषैर्नलिप्यते॥इतिध्यात्वा॥अमृतोपस्तरणमसीतिमंत्रेणापो
शानंनिःशेषंगृहीत्वाजलंपीत्वास्मृत्यर्थसारपरिशिष्टात्सर्वांगुलिक्षि
प्तोसानाद्गृह्णीयात्॥ॐ प्राणायस्वाहाप्राणायेदं॥ॐ अपानाय
स्वाहाऽपानायेदं॥ॐ व्यानायस्वाहाव्यानायेदं॥ॐ उदानायस्वा

न

हाउदानायेदं०॥ॐसमानायस्वाहासमानायेदं०॥इत्याचम्यनाय
पस्तंबाच्यंचाहुतीर्बिदरीफलमिताःसघृताःसक्षारावाश्वर्वाकुरु ति
मुखांतःप्रक्षाश्यैवंकमुखेहुत्वाब्रह्मणिमात्माऽमृतत्वायेत्यर्च्य
वाक्पाणिपादंत्वापस्थंवर्जयेत्॥अत्रप्रणवोहृदयागश्चप्राणाग्नि
होत्रादोवावगंतव्यः॥अत्रायंजीवपित्तकौस्तिकानांमोनंनियत ति
मेव॥तथा॥अत्रवामनपात्रान्तारंभोमोनंचपालिकायंत्रेन्यस्तपात्र राम॰
विषयमेवपालिकायंत्रेन्यस्तपात्रा भावेत्राणाहुतिपर्यंतंपा ७२

त्रान्तारंभोमोनंचसर्वेषांनियतमेवेतिभट्टोजीये॥ततःसव्यपाणिं
प्रक्षालयेत्॥सदक्षिणतोजलपात्रंस्थापयेदितिरामार्चनचंद्रि
कायामुक्तंदृढमनुना॥तथा॥दक्षिणनपिबेद्विप्रोभुंजानःपाणिनै
कमित्याश्वलायनःस्मृत्यर्थसारे॥ततःकृतसंध्यासमाप्तौनिःश
ब्दंग्रासंत्रासरहितंभोगदायंभुंज्यात्॥तत्रादावोदनःपश्चाद्भक्ष्य
णीतिधर्मशास्त्रे॥वैद्यकेतादौभक्ष्यंपश्चात्पायसमंतेऽन्नदृ
तियपायियंभुक्तंतेसलंवारिपिबेत्॥ततोभुक्तश्चोत्थायसर्वस्माद्

न्नाकिंचिल्किंचिद्दादायाघ्रायसोदकमुच्छिष्टभागधेयेभ्यस्त्वक्षीर
राणोज्ञानार्थमप्रक्षालितएवपाणावुदकमादायामृतपिधानम
सीतिमंत्रेणाङ्गुंगंडूषंपीत्वाऽङ्गैरवेःपुण्यनिरयेपूयाभ्रेदनिवासि
नां॥अश्विनामुदकंदत्तमक्षय्यमुपतिष्ठतु॥इतिमंत्रेणतद्यथाधि
कारंदेवपितृतीर्थेनकमोजलंनिनायतत्रैवपात्रांतरेवहिर्गत्यस्रु
ग्भ्रमोवापवित्रमत्यज्यसव्यमुत्तरकरस्थितमुच्छिंप्रक्षाल्यपादौ
चमकृत्प्रक्षाल्यषोडशगंडूषान्कृत्वाद्विराचम्यपुनरुदकमादायह

सौविसृज्यपरिस्राव्यांगुष्ठाग्रेणस्रुक्षोर्निषिंचन्यवेत॥अर्यानिंचसु
कन्यांचचवनंग्राक्रमश्विनौ॥भोजनांतेस्मरन्नक्षोरंगुष्ठाग्रांगुलि
क्षिपेदितिमंत्रेणत्रिःसकृद्वानिषिंच्य।वयःसुपर्णेत्यस्यगौरिवीति
रिंद्रावश्विनौजगतीचक्षुस्तेजोभिरित्यर्धर्चमक्षिणीपरिमार्जनेने
वि०॥ॐवयःसुपर्णोउपसेदुरिंद्रंप्रियमेधाःकण्वयोनाधमानाः॥
अपध्वांतमूर्णुहिपूर्धिचक्षुर्मुमुग्ध्यस्मान्निधयेवबद्धान॥इत्य
क्षिणीसंमृज्यपाणिनोदरमालभन्यवेत॥ऋग्विधाने॥अग्निरस्मि

तिमंत्रस्यगाधिनोविश्वामित्रोमरुत्वानिष्टुप्॥भुक्तान्नपाचनार्थेजपेवि
नियोगः॥ॐअग्निरस्मिजन्मनाजातवेदाघृतंमेचक्षुरमृतंमआसन्॥अ
र्कस्त्रिधातूरजसोविमानोजस्रोघर्मोहविरस्मिनाम॥ॐआ प्या
यस्वसमेतुतेविश्वतःसोमवृष्ण्यं॥भवावाजस्यसंगथे॥संतेपया
सिसमुयंतुवाजाःसंवृष्ण्यान्यभिमातिषाहः॥आप्यायमानोअ
मृताययसोमदिविश्रवांस्युत्तमानिधिष्व॥अगस्त्यःखनमानःखनि
त्रैःप्रजामपत्यंबलमिच्छमानः॥उभौवर्णावृषिरुग्रःपुपोषसत्यादे

वेष्वाशिषोनगाम॥ इतिश्रौतेसोमाप्यायनातिदेशात्सवेत्र॥ऋ
ष्यादिस्मरणमपिश्रौतातिदेशादवलुप्तं॥पुराणांतरे॥अगस्तिं
कुंभकर्णंचवन्हिंचवडवानलं॥आहारपरिणामार्थंस्मरेभिमचवृ
कोदरं॥तथा॥अगस्तिरग्निर्वडवानलश्चभुक्तंमयान्नंजरयत्वशे
षं॥सुखंममैतत्परिणामसंभवंयल्लवरोगंममचास्तुदेहमितिमं
त्राभ्यांचोदरंस्पृष्ट्वेष्टदेवतांस्मृत्वासासनेनपविश्यतांबूलचर्व
णंकृत्वेतिदासपुराणेश्रवणादिभिर्दिनशेषंसमापयेत्॥इतिभो

जनं॥ अथ प्राङ्करणं॥ उत्सर्गपरा ह्यागाईपत्यं प्रज्वलेति एतच्च त
स्याग्निहोत्रेण प्राङ्करणहोमकालोव्याख्यातः क्रियाश्वलायनगृ
ह्योक्तः॥ कालांतरमाह यमः॥ सूर्ये तु होममप्राप्ते षट्त्रिंशद्घटिकायु
तेः॥ प्राङ्करणमग्नीनां प्राप्तर्नासाग्रदर्शनइति कालेज्ञाता शुचि
राचांत्याग्निं प्रज्वाल्य जलाशयं गत्वा गृहेचादेवद्विजगोष्ठतुलस्यादि
शुचिस्थलेसंध्योपासनंकुर्यात्॥ इतिप्राङ्करणं॥ अथसायंसं
ध्या॥ पादोपाणेचप्रक्षाल्य द्विराचम्यप्राणानायम्यममोपात्तदुरित

क्षयद्वारास्त्रीपरमेश्वरप्रीत्यर्थंसायंसंध्यामुपासिष्यइतिसंकल्प्य
देवस्थमभ्यर्च्यनंकृत्वाऽग्निश्चेत्यस्यानुवाकस्ययाज्ञिकुपनिषद्
ऋषिः॥ अग्निमत्युमन्त्युपत्यहानिदेवताप्रकृतिश्छंदः॥ मंत्राचमन
वि०॥ ॐ अग्निश्च० यद्द्यापाप० अहस्तदवलुं० सत्येज्योतिषिजु
होम्यग्नयेस्वाहा॥ इतिमंत्राचमनंकृत्वाच म्यस्यदेवद्वितीयतृतीयचतु
र्थमार्ज्जनाघमर्षणंतत्कृत्वाजलाग्रमपत्र्यादायदक्षिणाकृहायव्यप
श्चिमसंध्याभिमुखस्तिष्ठन्नेवमदीनलेक्षिपेत्॥ गायत्र्या० सायंस

ध्यार्घ्यदाने०॥ॐतत्स०त॥सवित्रेइदमर्घ्यंसमर्पयामीत्येवंमंत्रा
दृत्यादर्घंवत्त्रिरर्घ्यंदत्त्वाप्रदक्षिणंपरियन्परिषिच्यद्विराचामेत्॥
यत्तुसायंतूपविश्योदुवीतिवचनंकश्चिल्लिखितंतछाखांतरविषय
मेव॥तदाहवृद्धमनुः॥करणंतोयमादायगायत्र्याचाभिमंत्र
येत्॥आदित्याभिमुखस्तिष्ठन्त्रिरूर्ध्वंसंध्ययोःक्षिपेदिति॥तथा
चयोनकः॥अंजलावपआदायगायत्र्याचाभिमंत्रयेत्॥इत्या
दर्घ्यत्रयंतिष्ठन्त्रिषुकालेषुबह्वृचइत्याश्वलायनस्मृतौ॥

राम॰ ७७

२रवेरभिमुखस्तिष्ठन्त्रिरूर्ध्वंसंध्ययोःक्षिपेदिति।तथाजलमंजलिनादाय
गायत्र्याचाभिमंत्रयेत्॥२

वाजपेययाजिनोप्येवं॥एवंत्रिरर्घ्यंदद्यादिति॥अन्यत्समानं॥
जपेदिड्डित्यमस्तुकारिकायां॥अहरस्तमितआदित्येपश्चिमस्य
यदुत्तरः॥भागस्तन्मुखमासीनःसावित्रीवाप्यतोजपेदिति॥पुनः
प्यादित्रियउत्तरोभागोनवशमदेशइतिनारायणवृत्तिः॥वाय्व
पश्चिमसंध्याभिमुखउपविश्यनासाग्रेधृतस्रुक्कःकरूपकरावद्यो
स्तमितेमंडलेआनक्षत्रदर्शनात्सर्ववेदार्थानुसंधानेनसावित्रीज
पेत्तदन्यासीतेउपस्थानंकुर्यात्॥आश्वलायनस्मृतौ॥इमंमेवरु

णांतत्वायामीत्यृचोराजोगार्तिःस्मुनःस्रोपोवरुणोगायत्रीद्वितीया
त्रिष्टुप्संध्योपस्थाने॰इत्युच्चार्यैजपदिङ्मुखएवतिष्ठन्कृतांज
लिः॥ॐइमंमेवरुणश्रुधीहवमद्याचमृळय॥त्वामवस्युराचके
ॐतत्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः॥ॐ
हे ळमानोवरुणेहबोध्युरुशंसमानआयुःप्रमोषीः॥जातवेदसे
त्यादिसर्वोक्तमंत्रैरुपस्थायप्रतित्यादिचतसृभिश्चप्रदक्षिणंच
तुष्टयंकृत्वाप्रतीच्यैदिशोऽस्यादिदिगुपस्थाननमस्काराभिवादनंदि

राचमनांतंकुर्यात्॥इतिसायंसंध्या॥अथसायमौपासनं॥आच
मनादिप्रातरौपासनवत्कृत्वाग्नीपरमेश्वरीत्यर्थेसायमौपासन
होमंकरिष्यइतिसंकल्पेनपूर्ववत्कृत्वाअग्नयेस्वाहेतिप्रथमांहु
तीर्जुहुयात्॥अन्वारब्धसमानं॥अग्नआयूंषीतिसूक्तेनशान्तेवरा
नसाःपवमानोऽग्निर्गायत्रीअग्न्युपस्थाने॰॥अग्नआयूंषि॰३॥अ
ग्नेत्वंइतिचतसृणांगौपायनोवाबंधुःसुबंधुःश्रुतबंधुर्विप्रबंधु
श्चाग्निर्ऋषिपदाविराट्॥अग्नु॰॥अग्नेत्वन्नो॰॥४॥प्राजापत्याप्रातर्वे

त्र॥तंतुंतन्वन्नजसेवोप्निर्जगन्ती॥अम्यु०। तंतुंतन्वन्
०॥हिरण्यगर्भइत्येनेनसर्वेवदुपतिष्ठेत्॥होमकालस्त्वस्तोत्तरस्मि
मुहूर्तेउदयोत्तरश्चत्रिमुहूर्तेक्रमेणसायंप्रातश्चहोमंकुर्यादिति
प्रयोगपारिजाते॥सायमस्तमितेहोमकालस्तुनवनाडिकेतिस्मृ
त्यर्थसारः॥प्रातर्दशनाडिकेतिनारायणवृत्तिः॥इतिसायंहो
मनहोमः॥अथसायंवैश्वदेवः॥सायंवैश्वदेवेनयक्ष्यइतिसंक राम.
ल्पःसर्ववत्सूर्यपदस्थानेअग्नयेस्वाहेतिविशेषः॥तथाप्रत ७९

यज्ञेपिसर्वेभ्योभूतेभ्योनमःचारिभ्यःस्वाहेतिविशेषः॥अन्यस
मानंसायंवैश्वदेवेनवानेवविशेषः॥इतिसायंवैश्वदेवः॥ अ
थब्रह्मचारिणांसमिदाधानं॥ब्रह्मचारीतुसायंप्रातःसंध्योपासना
नंतरंसमित्संसमिदाधानंकुर्यात्॥आचम्यप्राणानायम्यसमोपात्त
दुरितक्षयद्वारापरमेश्वरप्रीत्यर्थंसायंसमिदाधानंकरिष्ये॥
प्रातस्तुप्रातःसमिदाधानंकरिष्यइतिसंकल्पःपरिसमूहनपर्यु
क्षणंकृत्वाविश्वानिनइतित्रिःएवंवदग्निमंकृत्वापादेश

मात्रंसमित्खंडमादाय॥अग्नयेसमिधमाहार्षंबृहत्तेजातवेदसेत्व
यत्समग्नेवर्द्धस्वसमिधाबृहताचवयंस्वाहेतिमंत्रेणसमिधमग्नौ
वाधायाग्नयइदं०॥ततअर्द्रपाणितलमग्नौप्रतापयतेजसासामास
मनज्मीतिमंत्रेणसंहृतोष्ठहृदयमुखमवाङ्मुख्यपाणिप्रक्षाल्यपु
नरग्निःकृत्वोत्थायोपतिष्ठेत्॥ॐमयिमेधांमयिप्रजांमय्यग्नि
स्तेजोदधातुमयिमेधांमयिप्रजांमय्यिंद्रइंद्रियंदधातुमयिमेधा
मयिप्रजांमय्यिस्योमाजोदधातु॥यत्तेअग्नेतेजस्तेनाहंतेजस्वी
भूयासंयत्तेअग्नेवर्चस्तेनाहंवर्चस्वीभूयासंयत्तेअग्नेहरस्तेनाहंहरस्वी

एम॰ ८०

भूयासमित्यु पस्थायोपविश्यपरिसमूहनपर्युक्षणेकृत्वास्रुक्व
ङ्मविभृत्याज्यंविधाद्याग्नेप्रायश्चनादिकृत्वाद्विराचमेत्॥इतिब्रह्म
चारिणांसमिदाधानं॥अथद्वितीयभोजनं॥तत्रभानुवासरसं
क्रांतिपर्वद्वयव्यतीपातवैधृतिश्राद्धदर्शीश्राद्धदिनतत्सर्वदिना
तिरिक्तदिनेषुरात्रौप्रसर्वोक्तविधिनाभोजनपात्राधोमंडलमकु
र्वीनलघुशुक्लार्द्धयाममात्रंवेदाध्यीत्यसपेत्॥इतिद्वितीयभो
जनं॥अथअवश्यकविशेषानित्यप्रायश्चित्तानिचवक्ष्यंते॥तत्रा

शौचमाह मनुः ॥ शौचेयत्नः सदाकार्यः शौचमूलो द्विजस्मृतः ॥ शौ
चाचारविहीनस्य समस्ताः निष्फलाः क्रियाइति ॥ तदेतद्विविधं ॥
मत्स्यपुराणे ॥ शौचंचद्विविधंप्रोक्तंबाह्यमाभ्यंतरंतथा ॥ मृज्जल
न्यांस्मृतंबाह्यंभावशुद्धिस्तथांतरमिति ॥ तद्दंतशुद्धिंचकुर्यादि
तियाज्ञवल्क्यः ॥ प्रातःस्नानंतुमत्स्यपुराणे ॥ स्नानमूलाः क्रियाः
सर्वाः श्रुतिस्मृत्युदितास्नृणां ॥ अस्नातस्यत्वमान्नार्हाजपहोमा
दिकर्मसिति ॥ प्रातःस्नानाकरणेप्रत्यवायः सएवाह्नसाहंप्रात

रस्नायीद्विजः शूद्रत्वमाप्नुयात् ॥ अतएवसदास्नायादशक्तश्चेद्र
वर्दिनइति । तन्मुखंनद्यादावितिविज्ञानेश्वरः ॥ अशक्तादीनां
सएवाह ॥ वाप्यांकूपेतडागेचपारक्येवोष्णवारिणि ॥ प्रातःस्नानं
द्विजःकुर्याडुष्टेनैवसदातुरइति ॥ तथा ॥ नित्यमुष्णोदकेस्नाया
दशक्त्यनेमित्तिकादृते ऋतिसंग्रहवचनमपश्यक्त परं ॥ एतदशक्त
मंत्रस्नानादिवाकुर्यात् ॥ प्रातःस्नानंसंक्षेपेणकर्त्तव्यंसाग्निकैः ॥
अत्यंतवाह्नोमकालस्यबहुत्वात्स्नानकर्मणः ॥ प्रातःसंक्षेपतःस्ना

नंहोमाद्यंर्यंतदिष्यतइतिकात्यायनोक्तेः॥सोपाध्यवतीमिरश्मि
रस्तानंकाम्यनेमितिकंविनाकर्त्तव्यमितिस्मृत्यर्थसारः॥अ
थसंध्याकालः॥आश्वलायनगृह्ये॥अर्हास्तमितेमंडलआनक्ष
त्र दर्शनादेवंप्रातःप्राङ्मुखस्तिष्ठन्ना मंडलदर्शनादि
ति॥तत्रापित्रिविधमुक्तंधर्मसारसुधानिधौ॥उत्तमसूर्यसहिता
मध्यमालुप्ततारका॥कनिष्ठातारकोपेतासायंसंध्यात्रिधामता॥
तथा॥उत्तमात्रिसनक्षत्रामध्यमालुप्ततारका॥कनिष्ठासूर्यस

हितासातःसंध्यात्रिधामतेति॥मुख्यएवायंकालः॥गौणकालस्त्व
स्तोत्तरमुदयोत्तरंचत्रिदंडात्मकः॥सायंसंध्यात्रिघटिकात्यस्तादु
परिभास्वतइतिनिर्णयसिंधौस्कांदोक्तेः॥एतत्कालातिक्रमेत्वा
श्रित्तसर्वकंसंध्यांकुर्यात्॥तथाचस्मृत्यंतरे॥उदयाद्घटिकास्ति
स्रःप्रातःसंध्या मुपासितुं॥सायमस्तमयादूर्ध्वंमध्याह्नेकादशो
र्ध्वतः॥संध्याकालस्त्वयंप्रोक्तोनिष्कृतिस्तदतिक्रमे॥विधयाविधि
मार्गेणततःफलवतीक्रिया॥तामेवाहयमः॥संध्याकालेत्वतिक्रा

तस्मात्त्वाचम्ययथाविधि॥जपेदष्टशतंदेवीततःसंध्यांसमाचरेद्दि
तथाचस्मृत्यंतरेभारद्वाजः॥प्राणायामत्रयंप्रातर्द्विगुणंसंगवे
स्मृतं॥मध्याह्नेत्रिगुणंप्रोक्तमपराह्नेतुषड्गुणं॥सायाह्नेदशगु
णंसूर्य हस्यांततोव्रजेदिति॥तथाचगौतमस्मृतौ॥काला
तिक्रमणेचैवत्रिसंध्यास्वपिसर्वदा॥चतुर्थार्घ्यंप्रकुर्वीतशिरो
व्याहृतिसंयुतं॥यदा॥चतुर्थार्घ्यंतुसावित्र्याद्यद्याहृतिसंयु
टं॥कालातीतविशुध्यर्थंत्रिसंध्यास्वपिनित्यशइति॥एकाहाद्यति

राम॰
८२

क्रमेतुपारिजातेजमदग्निः॥एकाहंसमतिक्रम्यप्रमादादकृतंय
दि॥अहोरात्रोषितोभूत्वागायत्र्याश्चायुतंजपेत्॥द्विरात्रेद्विगुणं
प्रोक्तंत्रिरात्रेत्रिगुणंस्मृतं॥त्रिरात्रात्परतश्चैवशूद्रएवनसंशयइ
ति॥आलस्यादिनाकालेनोपेतुसएवाह॥यःसंध्यांकालतःपा
प्तामालस्यादतिवर्त्तते॥सूर्यहत्यामवाप्नोतिउलूकत्वमवाप्नुया
त्॥तथारोगार्त्तदोषेतुनदोषः॥राङ्क्षोभैरोगार्त्तोक्षयसूतकेसं
ध्यावदनविच्छित्तिनेदोषायकथंचने तिस्मृतेः॥तथा॥सूतकेम

नृपशोभे

त्केचैवसंध्याकर्मनसंत्यजेत्॥मनसोच्चारयेन्मंत्रान्प्राणायामंवि
वर्जयेत्॥कालातिक्रमेपिदोषाभावनिमित्तानिसप्तवाह॥देवाग्नि
द्विजवेदानांकार्यमहतिसंस्थिते॥संध्याहीनेनदोषोस्तियेनत्तस्तु
त्यसाधनमिति॥स्मृत्यर्थसारेतुसंध्यात्रयलोपेत्वष्टसहस्रमितं
सावित्रीजपेदित्युक्तं॥अत्यत्राक्तोतुस्मृत्यंतरेप्रतिसंध्याकालज
पेगायत्रीशतंशतंवाजप्येत्युक्तमस्तीत्यल॥संध्योत्तरब्रह्मचा
रीअग्निकार्यकुर्यात्॥अग्निकार्यविनाभोजनेप्रायश्चित्तमृग्विधा

ने॥मानसेलोकेजपेन्मंत्रंशतवारंशिवालये॥अग्निकार्यंविनाभुंक्ते
नपापंब्रह्मचारिणइति॥स्मृत्यर्थसारेतु॥संध्याग्निकार्यलोपेस्त्रा
ताऽष्टसहस्रगायत्रीजपउक्तः॥भिक्षालोपेष्टशतमिति॥अम
त्यापरित्यागेतुयाज्ञवल्क्यः॥भैक्ष्याग्निकार्यत्यक्तातुसप्तरात्र
मनातुरः॥कामावकीर्णइत्याभ्यांजुहुयादाहुतिद्वयं॥उपस्पृ
शंस्ततःकुर्यात्समासिंचत्वनेनत्विति॥मंत्रोक्तसंख्याक्षरायुक्तो
ऽत्यत्राक्तोऽग्निविधाने॥तंवोधियाजपेन्मंत्रंलक्षमेकंशिवालये

ब्रह्मचारीस्वधर्मेऽन्यूनंचेत्प्रणीमेतिदिति॥अथप्राऽङ्करणका
लः॥उदादित्यास्तमयात्पुरादित्यस्योदयादितिबोधायनोक्त्वा
द्विहरणानंतरमस्तमयोदयोर्यथाभवतस्तयाविहरेत्॥तथा॥
अधिवृक्षसमयेआविःसूर्ये चेत्यापस्तंबसूत्रेचोक्तं॥उदयास्तम
यासूर्वमुद्धरणस्यकालः॥एतत्प्राऽङ्करणकालातिक्रमनिमित्तक
यश्चित्ताभावात्सर्वप्रायश्चित्तमेवकार्यं॥तद्यथा॥होमकालेअ
स्तमयोदयात्सर्ववाप्राऽङ्करणाकरणनिमित्तकप्रत्यवायप्रा

राम॰
८५

तर्वाहोमंकरिष्यइतिसंकल्प्यहोमद्रव्यसंस्कारात्सर्वसंस्कृताज्ये
नऽंऽश्चर्भुवःस्वःस्वाहेतिसर्वप्रायश्चित्तसंकल्पेणहुत्वाहोमद्र
व्यसंस्कारादित्राप्तकालहोमंकुर्यात्॥अथहोमकालःदीपे॥अ
ग्निहोत्रहोमस्योदयानंतरमस्तमयानंतरंचमुख्यःसायंप्रदोषा
तःप्रातःसंगवांतावामुख्यःकालइतिहोचुः॥गौणस्तु॥सायं
होमस्यनिशासर्वागौणःकालःप्रातर्होमस्यसर्वमहर्गौणःकाल
ः॥आप्रातराहुतिकालात्सायमाहुतिकालोनातीयादसायमा

कृतिकालात्प्रातराकृतिकालइतिबोधायनसूत्रोक्तेः॥प्रदोषांतस्तु
॥रात्र्याःसायमाद्यचतुर्थोभागःप्रदोषःदिवसस्याद्यचतुर्थोभा
गःसंगवइतिदीपनक्तं॥आश्वलायनश्रौतसूत्रेतु॥प्रदोषांतोहो
मकालःसंगवांतःप्रातः॥अत्रप्रदोषांतोनामाष्टौनाडिकाइतिकल्प
तार्थइति।दीपनक्तं॥तथा॥सायमस्तमितेहोमकालस्तुनवना
डिकेतिसत्यर्थसारोक्तश्चतथा।संगवांतःप्रातरित्यत्रसंगवांतोद
शनाडिकेतिनाराय्यणवृत्तिः।अस्तमितउदितेचविहितोहोमएता

३ होम कालातिक्रमेप्रायश्चित्तपूर्वकंगौणकालेहोमंकुर्यात्तत्प्रयोगश्च।उक्तंच

वतिकालेक्रियमाणेनातीतेभवतीतिवृत्तावुक्तेःपुनःपुनःका
लावधिः॥तमतिनीयचतुर्गृहीतमाज्यंजुहुयादितिश्रौतसूत्रे उक्तं
होमकालातिक्रमनिमित्तप्रायश्चित्तसर्वंकंसायमोपासनहोमंक
रिष्यइतिसंकल्प्यहोमद्रव्यसंस्कारात्सर्वमाज्यंसंस्कृत्यस्रुचिचतुर्वारं
गृहीत्वासायंदोषावस्तर्नमःस्वाहा॥अग्नयइदं०॥ततोहोमद्रव्य
संस्कारादिहोमंसमापयेत्॥एवंप्रातरपिनक्तहोमकालातिक्रम
नि०कं प्रातरुपा०प्रवेवच्चतुर्गृहीत्वाप्रातर्वस्तर्नमःस्वाहाअग्नय

इदं०॥ततःसर्वेवह्नोमंकुर्यात्र॥अथहोमाधिकारिणः॥स्मृत्यर्थसा
रे॥होमेमुख्योयजमानःपत्नीपुत्रश्चकन्यका॥ऋत्विक्शिष्योगु
रुर्भ्राताभागिनेयःसुतापतिः॥एतैरेवकृतंयज्ञतदुतंस्वयमेव
विति॥तत्रापियजमानतत्पत्न्यनुज्ञयातत्समक्षएवऋत्विगादी
नांहोमादावधिकारःसएवाह॥असमक्षेतुदंपत्योर्हीतव्यंनवि
गादिना॥द्वयोरप्यसमक्षंचेद्दुष्कृतमनर्थकमिति॥उन्मादादाव
नुज्ञांविनेवहोमादिकुर्यात्॥उक्तंचस्मृत्यर्थसारे॥उन्मादेप्रसवेच

राम॰ ८७

नाकुर्वीतानुज्ञयाविना॥नोपवासीप्रवासेस्यात्पत्नीधारयतेव्रतं
सर्वथायजमानोहित्यजेत्तं द्विजोत्तमः॥शुचिरिति॥अथाङ्गकर्मो
पयुक्तानिचेत्तानिरात्र्याःप्रथमयामेयथाक्रमंकर्त्तव्यानिदि
वोदितानिकर्माणिप्रमादादकृतानिच॥यामिन्याःप्रथमेयामेता
निकुर्याद्यथाक्रमंमितिविष्णुस्मृतावुक्तेः॥तथा॥दिवोदितानिकर्मा
णिप्राप्नुवंत्युत्तराणिच॥दिवोदितानिकृत्वैवविदध्यादुत्तराणिचे
त्याचारत्नेस्मृतावुक्तेश्च॥तत्रस्नानविधिनास्नानंकृत्वायज्ञंसोरं

वर्जयेत्विवाऽन्यानिकुर्यात्॥एत्रोपूर्वाह्णपर्यंतंदिवाकर्माणिकारयेत्
अवगाहंचसौरंचब्रह्मयज्ञंचवर्जयेदित्यंगिरसोक्तेः॥तथा॥दिवादि
ताःक्रियाःकार्यारात्रावपियथाक्रमं॥अवगाहंविनासौरंब्रह्मयज्ञंचत
र्पणमिति संग्रहोक्तेश्च॥अत्रारात्रावपिकेचिन्नव्याःपूर्वयामेब्रह्मयज्ञ
मिच्छंति॥तज्जयंताम्बत्सायनस्तोनकाद्यस्तूदयोत्तरमस्तमयावधे
र्ब्रह्मयज्ञमिच्छंतितदवयुक्तं॥अस्तमयोत्तरंब्रह्मयज्ञाकरणप्रा
यश्चित्तमेवकुर्यात्॥तदुक्तंवृत्तौकारिकायांच॥एतेभ्यःपंचयज्ञे

भ्योयद्येकोपिचहीयते॥मनस्वत्याकृतिस्तत्रप्रायश्चित्तंविधीयत
इति॥विधुरब्रह्मचार्यादीनामयंप्रायश्चित्तहोमोलौकिकेबोध्यः॥
मध्याह्नसंध्यातुरावपिकर्त्तव्या॥कुर्योदावर्त्तनींसंध्यांरात्रावपिन
दुष्यति॥दद्यादर्घ्यंतुगायत्र्यासौरमात्रंतुवर्जयेदितिस्मृतिरत्नाकरा
मुक्तेः॥एतत्रायत्र्यार्घ्यदानमाश्वलायनातिरिक्तविषयं॥आश्व
लायनेत्वाकृष्टीयएवार्घ्यत्रयंदत्वागायत्र्याकालातिक्रमप्राय
श्चित्तार्घ्यदानंकर्त्तव्यं॥यदिदिवोदितानिकर्माण्येककृतानियावत्सह

ग्यामिन्यास्नावक्रमेणैवसर्वाणिसोरंवर्जयित्वाकुर्यादाकृष्णायये
वार्घंदद्यादितिवृद्धपरिशिष्टोक्तेः॥सौरस्नानेतुसौरवैष्णवीयकंज
पेत्॥मध्याह्नसंध्यारात्रौचेत्रमादाक्रियतेयदि॥सौरस्नानेजपेत्त
त्कंसौर्यवैश्वानरीयकमितिऋक्षपरीयोक्तसंग्रहोक्तेः॥सौर्यवैश्वा
नरीयकंतुहविष्यांतमजरस्वर्विदीत्येकोनविंशर्चंवोध्यं॥रात्रावु
ल्लिख्यास्नातसुरतःस्नायादितिस्मृत्यर्थसारः॥रात्रिस्नानेत्वसंक
ल्पमघमर्षणमार्जनजलतर्पणगोपीचंदनधारणंचवर्जयेदितिस्मृति

र्मजर्यो॥इतिरात्रौपूर्वयामेदिनकर्मणांकर्तव्याकर्तव्यनिर्णयः॥अ
थत्रायनविधिः॥हारीतः॥त्रायनएहंगत्वाज्ञाप्यासमीपेनपविश्यजपे
त्॥सुत्रामाणंपृथिवींद्यामनेहंसंसुत्रामाणमदितिंसुप्रणीतिं॥दैवी
नावंस्वरित्रामनागसमस्रवंतीमारुहेमास्वस्तये॥रात्रीव्यख्यदाय
तीतिषळृचंसूक्तंजपेत्॥सर्पीषसर्पेफडंतेदूरंगच्छमहायशाः॥जन
मेजयस्ययज्ञांतेआस्तीकवचनंस्मर॥आस्तीकवचनंश्रुत्वायःस
र्पोनानिवर्तते॥शतधाभिद्यतेमूर्धिशिंशवृक्षफलंयथा॥योजरक

रणाजातोजरत्कार्यांमहायशाः।।तस्यस्वसापिभवंतेदूरंगच्छमहाय
शाः।।अस्मिंतंचार्थमिद्धिंचमुनातिंचापियःस्मरेत्।दिवावायदिवा
रात्रौनास्तिसर्पभयंभवेत्।।जरत्कारोर्जरत्कार्यांसमुत्पन्नोमहा
यशाः।।आस्तीकःसत्यसंधोमांपन्नगेभ्योभिरक्षतु।।अगस्ति
र्मोधवश्चैवमुचुकुंदोमहामुनिः।कपिलोमुनिरास्तीकःपंचैते
सुखशायिनइतिगोभिलः।।आदित्यचोरकफल्गुस्यब्रह्मलब्धव
रस्यच।।तस्यस्मरणमात्रेणचोराभवंतुनिःफलाः।।कफल्गुस्य

तुद्वेभार्येसंज्ञिनीप्रोहिनीतथा।।तयोःस्मरणमात्रेणचोराभवंतु
निःफलाइति।।तथा।।धनुपंचशरांसव्येदक्षिणेतावतःशरान्।वि
क्रमात्सकलंवीर्योसौचोरेभ्योरक्षतादिह।।स्मृत्यर्थसारस्कंद
उवाचनहोवेणुदंडंकमंडलुपात्रंतथैवच।।ताबुलादीनिसर्वाणिसमीपे
स्थापयेद्गृही।।यानिकानिचदुष्टानिद्रव्याणियानिकिंचिदनुलेपनं।।अल
क्ष्मीपरिहारार्थंनित्यंकुर्याद्विचक्षणः।।इत्यादिस्त्रियासहभोग्य
वस्तुसेव्यमानस्तांबूलंभक्षित्वाभिन्नशय्यामेकाकीप्राक्शिरा

विष्टदेवतांनत्वास्वपेत्॥तथाचविष्णुरणे॥स्वगृहेचशिरःपूर्वंश
शुर्यदक्षिणेतथा॥प्रत्यक्शिराःप्रवासेस्याद्गृहेकुर्याडुदक्शिरइ
ति॥एवंस्वपित्वामध्यरात्र्यंतेस्त्रियमुपेयात्॥पत्नीमृतुमतींस्निग्धां
तत्सांभोगविवर्जितां॥उपेयान्मध्यरात्र्यंतेजीर्णेन्नेतत्समानसइ
त्याश्वलायनस्मृतेः॥तद्यथा॥ततोमध्यरात्र्यंतेस्वरात्र्यांतःस्थि
तंषोडशाहर्तुमध्येचतुर्थदिवसादूर्ध्वमेकादशत्रयोदशादिनातिरि
क्तेषुमध्येचतुर्थीषष्ठ्यष्टमीत्रिदिनात्मकेकादशीव्रताभिधाये

एमं ९१

णदशम्येकादशीद्वादशीचतुर्दशीद्विपर्वश्राद्धदिनतत्सर्वव्रतोप
वासादिश्राद्धनिमंत्रणतद्भुक्तदिनत्रयंनिषौमवारभरिणीकृत्ति
काऽर्द्रामघाश्लेषाफाल्गुनीविशाखारोहिणीज्येष्ठामूलश्रवणीधनिष्ठा
पद्राजन्मर्क्षतत्सर्वापरशुभसंक्रांतिव्यतीपातवैधृतियोगपरशुक
जन्यायानिरिक्तदिनेषुपुत्रार्थीयुग्मदिनेकन्यार्थीविषमदिने
पूर्वतःकंठलंबितोपवीतोवाग्यतःसकुडुपगत्यस्त्रियमनिरी
क्षोत्थायमूत्रशौचात्त्रिगुणंपूर्वोक्तशौचंकृत्वापादौपाणीचप्रक्षा

त्यद्भिराचम्याग्निंपज्वालयेत्सुरतःस्नायात्॥ऋतौतुमैथुनेस्नायाद्
गर्भसंरक्षणेङ्गिरसः॥अनृतौतद्भावाच्चशौचंत्रिमैत्रवच्चरदिति
स्मृत्यर्थसारोक्तेः॥पुनस्तत्रौ॥अनृतावप्यनिषिद्धदिनेपूर्ववत्क
तोपवीतउपतास्नानवर्जंपूर्वोक्तशौचाचमनादिकुर्यात्॥यथा
कामीभवेद्वापिस्त्रीणांवरमनुस्मरन्नितियाज्ञवल्क्योक्तेः॥तथा॥
दिवामैथुनेअष्टम्यांचतुर्दश्यांपर्वणिमैथुनेचशौचादिविधायस
चैलंस्नात्वास्मृत्युक्तप्रायश्चित्तमपिकुर्यात्॥ततःप्रबोधकालपर्यंत

रम० ९२

सुप्तःपूर्ववच्छय्यायांयथासुखंस्वपेत्॥इदंप्रभातोत्थानादिशायनां
तंकर्मप्रतिदिनंकुर्यात्॥नास्तिक्यादकृतेतुप्रत्यवायःस्मृत्यर्थसारे॥
नास्तिक्यात्कर्महानेतुमासेनपतितःस्मृतःहारीतेनैवतस्य
शुद्धिरुक्तान्यथा॥तंनिरीक्ष्यार्कमीक्षेतसप्रेस्नायात्सचैलकं॥
तेनसहासनदास्यंकुर्वन्नश्नंतत्समः॥तदन्नभुक्तामद्यस्तुसद्य
यासनेनचेति॥तथाचस्मृतिदीपे॥द्वादशादमनग्निंसंध्याहीनो
दिनत्रयं॥चतुर्वेदोपिविप्रोसौशूद्रवन्नसंशयइति॥धर्मप्रदीपे॥

अस्नात्वाग्नीमलंभुंक्ते अजत्वाहयज्ञोणितं॥अकृत्वाकिमिभोभुंक्ते
अदत्वाविषमेवचेति॥नारायणोऽब्रवीत्॥निरग्निकस्ययाभार्यापरयो
षवज्जायते॥जारजास्युःप्रजास्तस्याःसविप्राजारउच्यतइति॥कूर्म
पुराणे॥इत्येतदखिलंप्रोक्तमद्यन्यहनिवेमया॥ब्रह्मणानांकृत्य
ज्ञानमपवर्गफलप्रद॥नास्तिक्याद्दष्टवालस्यात्ब्राह्मणोनकरो
तियः॥सयातिमरकान्घोरान्काकयोनौप्रजायते॥नान्योविमुक्ति
र्वेपंथामुक्त्वाश्रमविधिंस्वकं॥तस्मात्कर्मोणिकुर्वीतदृष्टयेपरमे

रम॰ ९२

ष्ठिनइति॥अग्निक्रियाचरणेफलविशेषमाहगोभिलः॥योवि
प्रःकृतनित्यकर्मसमर्वान्कृतवान्मखान्॥सस्नातःसर्वतीर्थेषु त
स्यतेनाखिलंतपइति॥अनेनविधिनाविप्रःसंध्याहोमादिकंचरन्
सर्वपापैःप्रमुच्यतजीवन्नेवशरदांशतं॥सर्वकर्मसुयोग्योसौभवती
त्याहशौनकं इत्यलमत्रग्रंथविस्तरभीतेः॥ साष्टांगप्रणामपू
र्वकंविज्ञापनंविज्ञाप्यतेसर्वेषामत्र॥संक्षेपाद्रिकमेतद्विमूलजि
ज्ञासुभिर्भक्तिनावमान्यंममूलत्वात्क्षन्तव्यंबहुश्रुतैरितिविज्ञप्तिः॥

स्मृत्यर्थसारंसंवीक्ष्यशौनकंस्मृतिसंग्रहं॥परिशिष्टंपारिजातंज
यंतान्यत्स्मृतीस्तथा॥आचारदीपरत्नंचहेमाद्रिंमाधवादिकान्॥
विचार्यावश्यकंनित्यंबह्वृचानांमयोदितं॥ कालोपनामरामेश्व
रभट्टस्तनोसुधीमतः॥महादेवद्विजाग्र्यस्यसूनुनाश्रभविष्णुना॥
दिवाकरेणरचितासंक्षेपाह्निकचंद्रिका॥गिरिजाजानिनुत्यर्थमु
दंवितनुतास्मतामिति॥ ॥इतिश्रीकालोपनामकृंहरामेश्वरात्म
जभट्टमहादेवद्विजवर्यसूनुबालभट्टानुजभट्टदिवाकरेणका

रम. ९४

भ

र्यांशिष्टेष्टतुष्टयेबह्वृचोपयोगीसंक्षिप्तग्रथितमाह्निकपद्धतिमा
करदर्शनात्॥आचाररत्ने॥अत्रयेषांसूत्रेतर्पणमात्रमुक्तंतेषां
सूत्रेतर्पणमात्रस्योपलक्षणत्वात्तन्मंत्रागमंत्रः॥तत्रस्मृत्यांजलिविधा
नेपिनमंत्रावृत्तिः॥अंजलयगलाभावात्॥येषांसूत्रेह्यस्तपेयेत्रिस्त
पेयेदित्युक्तंतत्रोपलक्षणवाक्यगतायाःसंख्यायाःस्मार्ताद्गुणीभूतो
क्तित्वेकर्मभेदकत्वान्तर्पणभेदेनदावृत्तौनदंगमंत्रस्यापावृत्तिः
येषांसूत्रेतुकिमपिनोक्तंतेषांस्मृत्युक्तोविधिः॥स्मृतौचद्वधा॥द्वि

मर्पयेदित्यक्तं॥अंजलिविधानमपिदृष्टं॥तत्रापिविकल्प :॥बहू
चानांतुनमंत्रावृत्ति:॥एकमंत्राणिकर्माणीतिन्यायेनवृत्तोक्त
पद्धिसूत्रन्यायोक्त:॥मंत्रस्तु॥अस्मत्पितरद्यामुकगोत्रवसुरूपंस
धानमस्तर्पयामीत्येतावान्॥संबंधनामगोत्रेणस्वधांतेननमोंत
त:॥तर्पयामिपदेनवतर्पयेत्सर्वकमितिकरणत्वनिर्देशात्॥
अत्रकेचिद्दृष्टप्रयोगनामधेयंमंत्रत्वमितिनाम्नोमंत्रत्वाभावइ
त्याहु:॥तन्न॥अनाम्नातेषुमंत्रत्वनाम्नांतेषुहिविभाग:स्यादित्य

धिकरणेह्यंप्रतिपादितं॥तत्रचवैदिकमंत्रांत:पातिनामेषांमंत्र
त्वं॥अतएवतत्रप्रसिद्धिहेतुत्वेनोक्ता॥मंत्रानध्यापयामोद्येत्यादि।
नचात्रतथा॥सत्रोक्तहेत्वसंभवात्॥वैदिकप्रसिध्यसंभवाच्च॥त
त्रतेषांतृतीयादिनिर्देशाभावान्निर्दिष्टांत:पातिनाममंत्रत्वमुक्तं॥
इहतृतीयानिर्देशान्मंत्रत्वेकोविरोध:॥किंच॥केवलस्यस्वधान
मइत्येतस्यस्वाहाकारस्थानीयत्वेनदेवतासमर्पकत्वाभावान्न
केवलेनतर्पणं॥नचसंबंधमनुकीर्त्यैवेत्यादिवसिष्ठस्मृतोनाम

कीर्त्तनमात्रान्नानान्नतत्सहितस्यमंत्रतंत्रकीर्त्तनकर्मोक्तेः॥ अत एवयज्ञनसंबंधनामगोत्रेणेतितृतीयाश्रुतिर्निर्देशः कृतः॥ तस्मा दस्मदित्यादितर्पयामीत्यंतावानेवमंत्रभुक्तः॥ श्रीभवानीशंक रार्पणमस्तु॥ शुभंभूयात्लेखकपाठयोः॥ श्रीरस्तु॥ संवत१८४२रामितिमाघमासेशुक्लपक्षेतिथौतृतीयायांभोमवा सरे॥ लि॰ ब्राह्मणज्ञातोदधीचभट्टगंगाधरेणवासनागोरमंत्रे पुस्तकअवंतीमध्येलीखीते॥ श्रीरस्तु॥ कल्याणमस्तु॥छे॥

॥ ॥इतिश्रीकाळोपनामकमहादेवसुतदिवाकरविरचितासं क्षेपाङ्किकचंद्रिकासमाप्ता॥ ॥इदंपुस्तकंथाव्युपनामकनागे शभट्टात्मजशेषभट्टस्य॥ ॥श्रीः॥ ॥राम॥ ॥छ॥ ॥

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

1089

इत्याङ्किकचंडिकासमाप्ता॥पत्र९७॥

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY